# ३५. चम्पापुरीकल्पः ।

कृतदुर्नयभङ्गानाम**ङ्गानां**[1] जनपदस्य भूषायाः । **चम्पा**पुर्याः कल्पं जल्पामस्तीर्थधुर्यायाः[2] ॥ १ ॥

अस्यां द्वादशमजिनेन्द्रस्य [3]श्री**वासुपूज्य**स्य त्रिभुवनजनपूज्यानि गर्भावतार[4]-जन्म-प्रव्रज्या-केवलज्ञान-निर्वाणोपगमलक्षणानि पञ्चकल्याणकानि जज्ञिरे ॥ १ ॥

अस्यामेव श्री**वासुपूज्य**जिनेन्द्रपुत्र**मघव**नृपतिपुत्री**लक्ष्मी**कुक्षिजाता **रोहिणी** नाम कन्याऽष्टानां पुत्राणामुपरि जज्ञे । सा च स्वयंवरेऽ**शोक**राजन्यकण्ठे वरमालां निक्षिप्य तं परिणीय पट्टराज्ञी जाता । क्रमेणाष्टौ पुत्रांश्चतस्रश्च[5] पुत्रीरजीजनत् । अन्यदा श्री**वासुपूज्य**शिष्ययो **रूप्यकुम्भ-स्वर्णकुम्भ**योर्मुखाददृष्टदुःखत्वे हेतुं प्राग्जन्मचीर्णं रोहिणीतपः श्रुत्वा सोद्यापनविधिं[6] प्राचीकटन्[7] मुक्तिं च सपरिच्छदाऽगच्छत् ॥ २ ॥

अस्यां **करकण्डु**[8]नामधेयो भूमण्डलाखण्डलः पुरासीद्यः **कादम्बर्या**मटव्यां **कलिगिरे**रुपत्यकावर्तिनि कुण्डनाम्नि सरोवरे श्री**पार्श्वनाथं** छद्मस्थावस्थायां[9] विहरन्तं हस्तिव्यन्तरानुभावात्कलिकुण्डतीर्थतया प्रतिष्ठापितवान् ॥ ३ ॥

अस्यां पुनः[10] **सुभद्रा** महासती पाषाणमयविकटकपाटसम्पुटपिहितास्तिस्रः प्रतोलीः [11]शीलमाहात्म्यादामसूत्रतन्तुवेष्टितेन तितउना कूपाज्जलमाकृष्य तेनाभिषिच्य सप्रभावनमुद्घाटत् । एकां तु तुरीयां प्रतोलीमन्याऽपि या किल मत्सदृशा सुचरित्रा भवति तयेयमुद्घाटनीयेति भणित्वा राजादिजनसमक्षं तथैव पिहितामेवास्थापयत् । सा च तद्दिनादारभ्य चिरकालं तथैव दृष्टा जनतया । क्रमेण **विक्रमादित्यवर्षेषु षष्ठ्यधिकत्रयोदशशतेष्वतिक्रान्तेषु लक्षणावती**हम्मीरश्रीसुरत्राण**समसदीनः** [12]**शङ्करपुर**दुर्गोपयोगिपाषाणग्रहणार्थं तां प्रतोलीं पातयित्वा कपाटसम्पुटमग्रहीत् ॥ ४ ॥

अस्यां **दधिवाहन**नृपतिर्महिष्या **पद्मावत्या** सह तद्दौहृदपूरणार्थमनेकपारूढः सञ्चरन् स्मृतारण्यानीविहारेण करिणा तां प्रतिव्रजताऽपवाहितः स्वयं तरुशाखामालम्ब्य स्थितः । करिणि पुरः सञ्चरिते व्यावृत्त्येमामेव स्वपुरीमागमत् । देवी चासामर्थ्यात्तदारूढैवारण्यानीमगात् । तदवतीर्णा क्रमेण सूनुं सुषुवे । स च **करकण्डु**र्नाम क्षितिपतिरजनि । **कलिङ्गेषु** पित्रा सार्धं युध्यमानः प्रतिषिद्धः[13] स्वजनन्या [14]आर्यया । क्रमेण महावृषभस्य यौवन-वार्द्धकदशादर्शनाज्जातः प्रत्येकबुद्धः सिद्धिं चाससाद ॥ ५ ॥

अस्यां **चन्दनबाला दधिवाहन**नृपतिनन्दना जन्म[15] उपलेभे । या किल भगवतः श्री**महावीरस्य कौशाम्ब्यां** सूर्पकोणस्थकुल्माषैः पारणाकारणया पञ्चदिनोनषण्मासावसाने द्रव्य-क्षेत्र-काल-भावाऽभिग्रहानपूरयत् ॥६॥

अस्यां **पृष्ठचम्प**या सह श्री**वीर**स्त्रीणि वर्षारात्रसमवसरणानि चक्रे ॥ ७ ॥

अस्या एव परिसरे श्री**श्रेणिक**सूनुर**शोकचन्द्रो** [16]नरेन्द्रः **कूणिका**पराख्यः श्री**राजगृहं** जनकशोकाद्विहाय नवीनां **चम्पा**मचीकरच्चारुचम्पकरोचिष्णुं राजधानीम् ॥ ८ ॥

अस्यामेव **पाण्डु**कुलमण्डनो दानशौण्डेषु दृष्टान्तः श्री**कर्ण**नृपतिरशाद्राज्यश्रियम् । दृश्यन्ते चाद्यापि तानि तानि तदवदातस्थानानि शृङ्गारचतुरिका[17]दीनि पुर्यामस्याम् ॥ ९ ॥

अस्यां सम्यग्दृशां निदर्शनं **सुदर्शन**श्रेष्ठी **दधिवाहन**भूपस्य राज्ञ्याऽ**भया**ख्यया सम्भोगार्थमुपसर्ग्यमाणः

---

1 D °मङ्गाजन° । 2 P विहाय सर्वत्र 'तीर्थपुर्यायाः ।' 3 Pa श्रीमे( दे? )ववासु° । 4 B C गर्भावतर° । 5 D °चतस्रः । 6 C D °विधि । 7 B D P प्राचीकशन् । 8 P करकुण्ड° । 9 P छद्मस्थावस्थां समधिगत्य विहरन्तं । 10 P विना नास्त्यन्यत्र 'पुनः' । 11 P शीतलकरचन्द्रलीलशीलमाहा° । 12 B शङ्करदुर्गोप° । 13 B P D प्रतिषिध्य । 14 B C D आर्यया जनन्या । 15 C जन्म लेभे । 16 P श्रेणिकसूनुरशोकचन्द्रापरनामधेयः । 17 B चतुरगाका°; P D चतुरका° ।

वि० क० ९

क्षितिपतिवचसा वधार्थं नीतः स्वकीयनिष्कम्पशीलसम्पत्प्रभावाकृष्टशासनदेवतासान्निध्यात् [1]शूलीं [2]हैमसिंहासनतामनैषीत्; तरवारिं च निशितं सुरभिसुमनोदाम भूय मनोदामनयत् ॥ १० ॥

अस्यां च **कामदेवः** श्रेष्ठी श्री**वीर**स्योपासकाग्रणीरष्टादशकनककोटिस्वामी गोदशसहस्रयुतषड्गोकुलाधिपति[3]-**भद्रा**पतिरभवत् । यः पौषधागारस्थितो मिथ्यादृग्देवेन पिशाचगजभुजगरूपैरुपसर्गितोऽपि न क्षोभमभजत् । श्लाघितश्च भगवताऽन्तःसमवसरणम् ॥ ११ ॥

अस्यां विहरन् श्री**शय्यम्भव**सूरिश्चतुर्दशपूर्वधरः स्वतनयं **मनका**भिधानं **राजगृहा**दागतं प्रव्राज्य तस्यायुः षण्मासावशेषं श्रुतज्ञानोपयोगेनाकलय्य तदध्ययनार्थं **दशवैकालिकं** पूर्वगतान्निर्व्यूढवान् । [4]तत्रात्मप्रवादात् षड्जीवनिकां, कर्मप्रवादात् पिण्डैषणां, सत्यप्रवादाद्वाक्यशुद्धिं, अवशिष्टाध्ययनानि प्रत्याख्यानपूर्वतृतीयवस्तुत[5] इति ॥ १२ ॥

अस्यां वास्तव्यः **कुमारनन्दी** सुवर्णकारः स्वविभववैभवाभिभूतधनदमदो[6]ऽङ्कुशकुशानुप्रवेशात्पञ्चशैलाधिपत्यमधिगत्य प्राग्भवसुहृदच्युतविबुधबोधितश्चारुगोशीर्षचन्दनमयीं जीवन्तस्वामिनीं सालङ्कारां देवाधिदेवश्री**महावीर**प्रतिमां निर्ममे ॥ १३ ॥

अस्यां **पूर्णभद्रे**[7] चैत्ये श्री**वीरो** व्याकरोद्-योऽ**ष्टापद**मारोहति स तद्भव एव सिध्यतीति ॥ १४ ॥

अस्यां **पालित**नामा श्री**वीरो**पासको वणिक् । तस्य पुत्रः समुद्रयात्रायां समुद्रे प्रसूत इति **समुद्रपालो** वध्यं नीयमानं वीक्ष्य प्रतिबुद्धः [8]सिद्धिं च प्रापत् ॥ १५ ॥

अस्यां **सुनन्दः** श्राद्धः[9] साधूनां मलदौर्गन्ध्यं[10] निन्दित्वा मृतः **कौशाम्ब्या**मिभ्यसुतोऽभूद्व्रतं चाग्रहीत् । उदीर्णदुर्गन्धः कायोत्सर्गेण देवतामाकृष्य स्वाङ्गे सौगन्ध्यमकार्षीत् ॥ १६ ॥

अस्यां **कौशिकार्य**शिष्याऽ**ङ्गर्षि-रुद्रका**[11]भ्याख्यानसंविधानकं सुजातप्रियंग्वादिसंविधानकानि च जज्ञिरे॥१७॥

इत्यादि नानाविधसंविधानकरत्नप्रकटनाना[12]वृत्तनिधानमियं पुरी । अस्याश्च प्राकारभित्तिं प्रियसखीव प्रतिक्षणमालिङ्गति सर्वाङ्गं[13] पावनघनरसपूरितान्तरा सरिद्वरा प्रसृत्वरवीचिभुजाभिः ॥ १८ ॥

उत्तमतमनरनारीमुक्तामणिधोरणिप्रसवशुक्तिः । नगरी विविधाद्भुतवस्तुशालिनी मालिनी जयति ॥ १ ॥

जन्मभू**र्वासुपूज्यस्य** तद्भक्त्या स्तूयते बुधैः । **चम्पा**याः कल्पमित्याहुः श्री**जिनप्रभ**सूरयः[14] ॥ २ ॥

**॥ इति श्रीचम्पापुरीकल्पः समाप्तः ॥**

॥ ग्रं० ४७ ॥

---

1 B Pa शूलं । 2 P हिरण्मय° । 3 C गोकुलपतिः । 4 B तत्त्वात्म° । 5 C D वस्तु इति । 6 B धनदमानो । 7 P पूर्णभद्रचैत्ये । 8 P सिद्धिं चाससाद हतविषादाम् । 9 P श्रावकः । 10 B C Pa मलदुर्गन्धं । 11 Pa °रुद्रकान्याख्यान°; C °रुद्रकाव्याख्यान° । 12 P °प्रकटमाना° । 13 P विहाय नास्ति 'सर्वाङ्गं' । 14 Pa सूरिभिः ।